Scanned by CamScanner

भगवताऽऽदित्येन गर्गादिभिश्च प्रणीतं बहुविधमेव।

शाखान्तरीयगुणोपसंहारेण वैदिकानुष्ठानक्रमविशेषज्ञानाय कल्पसूत्राणि। तानि च प्रयोगत्रयभेदात्त्रिविधानि। तत्र हौत्रप्रयोगप्रतिपादकान्याश्वलायन...शाङ्खायनादि प्रणीतानि।

सभी वेदों के लिये शिक्षाएँ हैं। "अब शिक्षा का कथन करूँगा" से प्रारम्भ करके पञ्चखण्डात्मिका शिक्षा पाणिनि के द्वारा प्रकाशित है। वेदों के प्रत्येक शाखाओं में भिन्न-भिन्न रूप से प्रातिशाख्य नाम की भिन्न-भिन्न शिक्षाएँ अनेक मुनियों के द्वारा प्रदर्शित हैं। इस प्रकार वैदिक पदों की साधुता के ज्ञान से अन्यत्र ऊह करना ही व्याकरण का प्रयोजन है। वह व्याकरण शास्त्र "वृद्धिरादैच्" से प्रारम्भ करके आठ अध्यायों में महेश्वर के प्रसाद से भगवान् पाणिनि के द्वारा विरचित है। पाणिनि के सूत्रों के ऊपर कात्यायन मुनि ने वार्तिक की रचना की। उनके वार्तिकों के ऊपर महर्षि पतञ्जलि ने महाभाष्य की रचना की। यह त्रिमुनि व्याकरण वेदाङ्ग और महेश्वर के प्रसाद से प्राप्त होने के कारण माहेश्वर भी कहलाता है। आचार्य कौमार आदि के द्वारा विरचित व्याकरण वेदाङ्ग नहीं हैं, किन्तु केवल लौकिक प्रयोगों के ज्ञान के लिये ही हैं।

इस प्रकार शिक्षा और व्याकरण के द्वारा वर्णों के उच्चारण और पदों की साधुता का ज्ञान हो जाने पर वैदिक मंत्रों और पदों के अर्थ-ज्ञान की आकांक्षा होती है। उसके लिये भगवान् यास्क ने 'समाम्नायः समाम्नातः स व्याख्यातव्यः' इत्यादि से प्रारम्भ करके त्रयोदश अध्यायों में निरुक्त की रचना की। उसमें नाम, आख्यात, उपसर्ग और निपात के भेद से चार प्रकार के पदों का निरुपण करके वैदिक मंत्रों तथा पदों के अर्थों का प्रकाशन किया। अनुष्ठेय पदार्थों का स्मरण के द्वारा ही मंत्रकरण होता है और वाक्यों के अर्थ-ज्ञान के प्रति पदों का अर्थ-ज्ञान कारण होता है। इसलिये मंत्रस्थ पदों के अर्थ-ज्ञान के लिये निरुक्त अवश्य अपेक्षित है। अन्यथा अनुष्ठान ही सम्भव नहीं होगा। 'सृण्येव जर्भरी तुर्फरी तू' इत्यादि दुरुह शब्दों का प्रकारान्तर से अर्थ-ज्ञान सम्भव नहीं है। इसी प्रकार वैदिक द्रव्य और देवात्मक निघण्टु भी पदार्थों के पर्याय शब्दात्मक और

Scanned by CamScanner

निरुक्त के ही अन्तर्भूत है। वह पञ्चाध्यायात्मक निघण्टु नाम के ग्रन्थ भी भगवान् यास्क के द्वारा ही विरचित है।

पादबद्ध और छन्द विशेष से युक्त ऋक् मंत्र होते हैं। उन छन्दों को न जाननेवालों के लिये निन्दाश्रुत है। छन्द विशेषनिमित्तक अनुष्ठान का भी विधान है। अतः छन्द के ज्ञान की आवश्यकता होती है। भगवान् पिङ्गल ने उसके ज्ञान के लिये 'धीः श्रीः स्त्रीम्' इत्यादि से प्रारम्भ करके आठ अध्यायों में छन्दों का विवरण प्रस्तुत किया। उसमें भी 'अलौकिकम्' इन तीन अध्यायों में अवान्तर भेदों के साथ गायत्री, उष्णिक् अनुष्टुप, बृहती, पंक्ति, त्रिष्टुम् और जगती छन्दों का निरुपण किया। उसके बाद 'अथ लोकिकम्' से आरम्भ करके पाँच अध्यायों में पुराण और इतिहास आदि के उपयोगी लौकिक छन्दों का प्रसंगतः निरुपण किया। जिस प्रकार व्याकरण में लौकिक पदों का निरुपण हैं, उसी प्रकार लौकिक छन्दों का भी निरुपण है। इसी प्रकार ज्योतिषशास्त्र का वैदिक कर्मों के अङ्गदर्श आदि कालों के ज्ञान के लिये भगवान् आदित्य और गर्ग आदि ऋषियों ने रचना की। यह ज्योतिषशास्त्र अनेक प्रकार के हैं।

शाखान्तरीय गुणों का उपसंहार के कारण वैदिक अनुष्ठानों के क्रमों का ज्ञान अपेक्षित है। उसके लिये कल्पसूत्र हैं। वे तीन प्रकार के प्रयोगों के भेद से तीन प्रकार के हैं—उनमें हौत्र प्रयोगों के प्रतिपादक आश्वलायन तथा शाङ्खायन आदि महर्षियों के द्वारा प्रणीत कल्पसूत्र हैं।

आध्वर्यवप्रयोगप्रतिपादकानि बौधायनापस्तम्बकात्यायनादिप्रणीतानि। औद्गात्रप्रयोगप्रतिपादकानि लाट्यायनद्राह्यायणादिप्रणीतानि। एवं निरुपितः षण्णामङ्गानां प्रयोजनभेदः।

चतुर्णामुपाङ्गानामधुनोच्यते। तत्र सर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितप्रतिपादकानि भगवता बादरायणेन कृतानि पुराणानि। तानि च ब्राह्मं पाद्मं वैष्णवं शैवं भागवतं नारदीयं मार्कण्डेयमाग्नेयं भविष्यं ब्रह्मवैवर्त्तं लैङ्गं वाराहं स्कान्दं वामनं कौर्मं मात्स्यं गारूडं ब्रह्माण्डं चेत्यष्टादश।

Scanned by CamScanner

आद्यं सनत्कुमारेण प्रोक्तं वेदविदांवराः।
द्वितीयं नारसिंहाख्यं तृतीयं नान्दमेव च॥
चतुर्थं शिवधर्माख्यं दौर्वासं पञ्चमं विदुः।
षष्ठं तु नारदीयाख्यं कापिलं सप्तमं विदुः॥
अष्टमं मानवं प्रोक्तं ततश्चोशनसेरितम्।
ततो ब्रह्माण्डसंज्ञं तु वारुणाख्यं ततः परम्॥
ततः कालीपुराणाख्यं वासिष्ठं मुनिपुङ्गवाः।
ततो वासिष्ठं लैङ्गाख्यं प्रोक्तं माहेश्वरं परम्॥
ततः साम्बपुराणाख्यं ततः सौरं महाद्भुतम्।
पाराशरं ततः प्रोक्तं मारीचाख्यं ततः परम्॥
भार्गवाख्यं ततः प्रोक्तं सर्वधर्मार्थसाधकम्।

एवमुपपुराणान्यनेकप्रकाराणि द्रष्टव्यानि। न्याय आन्वीक्षिको पञ्चाध्यायी गौतमेन प्रणीता। प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानाख्यानां षोडशपदार्थानामुद्देशलक्षणपरीक्षाभिस्तत्त्वज्ञानं तस्याः प्रयोजनम्। एवं दशाध्यायं वैशेषिकं शास्त्रं कणादेन प्रणीतम्। द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानामभावसप्तमानां साधर्म्यवैधर्म्याभ्यां व्युत्पादनं तस्य प्रयोजनम्। एतदपि न्यायपदेनोक्तम्।

बौधायन, आपस्तम्ब और कात्यायन आदि के द्वारा प्रणीत आध्वर्यव प्रयोगों के प्रतिपादक कल्पसूत्र हैं। लाट्यायन, द्राह्यायण आदि के द्वारा प्रणीत कल्पसूत्र औद्गात्र प्रयोगों के प्रतिपादक हैं। इस प्रकार छः अङ्गों का प्रयोजन तथा भेद निरूपित हुआ।

अब चारों उपाङ्गों का प्रयोजन कहते हैं। उनमें भगवान् बादरायण (व्यास) के विरचित सर्ग, प्रतिसर्ग, वंश, मन्वन्तर और वंशानुचरित का प्रतिपादक पुराण हैं। उन पुराणों की संख्या अट्ठारह है—ब्राह्म, पाद्म, वैष्णव, शैव, भागवत, नारदीय, मार्कण्डेय, आग्नेय, भविष्य, ब्रह्मवैवर्त्त, लैङ्ग, वाराह, स्कान्द, वामन,

कौर्म, मात्स्य, गारुड़ और ब्रह्माण्ड। इसी प्रकार उपपुराण भी अनेक प्रकार के हैं—यथा—सनत्कुमार के द्वारा विरचित आदिपुराण है। द्वितीय नारसिंह, तृतीय नान्द, चतुर्थ शिवधर्म, पञ्चम दौर्वास, षष्ठ नारदीय, सप्तम कापिल, अष्टम मानव, नवम औशनस, दशम ब्रह्माण्ड, एकादश वारुण नामक, उसके बाद काली पुराण और वासिष्ठ, वासिष्ठ लैंग और माहेश्वर, साम्ब और सौर, पराशर और मारीच एवं भार्गव पुराण है। ये उपपुराण सभी प्रकार के धर्म और अर्थ के साधक माने गये हैं।

न्याय दर्शन को ही आन्वीक्षिकी भी कहते हैं। यह दर्शन पाँच अध्यायों में विभक्त और गौतम प्रणीत है। प्रमाण, प्रमेय, संशय, प्रयोजन, दृष्टान्त, सिद्धान्त, अवयव, तर्क, निर्णय, वाद, जल्प, वितण्डा, हेत्वाभास, छल, जाति, निग्रह स्थान नाम के सोलह पदार्थों का उद्देश, लक्षण और परीक्षा के द्वारा तत्त्वज्ञान ही इसका प्रयोजन है।

कणाद ने दश अध्यायों में वैशेषिक शास्त्र का निर्माण किया। द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय, इन छः तथा सातवाँ अभाव नाम के पदार्थों का परस्पर साधर्म्य और वैधर्म्य के प्रतिपादन द्वारा शक्तिग्रह ही इस दर्शन का प्रयोजन है। इसका भी न्याय शब्द से कथन किया गया है।

एवं मीमांसा द्विविधा। कर्ममीमांसा शारीरकमीमांसा च। तत्र द्वादशाध्यायी कर्ममीमांसा "अथातो धर्मजिज्ञासा" इत्यादि "अन्वाहार्ये च दर्शनात्" (१६) इत्यन्ता भगवता जैमिनिना प्रणीता। धर्मप्रमाणम्। धर्मभेदाभेदौ। शेषशेषिभावः। क्रत्वर्थपुरुषार्थ······

भेदेन प्रयुक्तिविशेषः। श्रुत्यर्थपनादिभिः क्रमभेदः। अधिकारविशेषः। सामान्यातिदेशः। विशेषातिदेशः। ऊहः। बाधः। तन्त्रम्। प्रसङ्गश्चेति क्रमेण द्वादशाध्यायानामर्थाः। तथा सङ्कर्षणकाण्डमप्यध्यायचतुष्टयात्मकं जैमिनिप्रणीतम्। तच्च देवताकाण्डसंज्ञया प्रसिद्धमप्युपासनाख्यकर्म-प्रतिपादकत्वाकर्ममीमांसान्तर्गतमेव। तथा चतुरध्यायी शारीरकमीमांसा "अथातो ब्रह्म जिज्ञासा" इत्यादिरनावृत्तिः शब्दादित्यन्ता जीवब्रह्मैकत्व-

Scanned by CamScanner

साक्षात्कारहेतुः श्रवणाख्यविचारप्रतिपादकान्न्यायानुपदर्शयन्ती भगवता बादरायणेन कृता। तत्र सर्वेषामपि वेदान्तवाक्यानां साक्षात्परम्परया वा प्रत्यगभिन्नाद्वितीये ब्रह्मणि तात्पर्यमिति समन्वयः प्रथमाध्यायेन प्रदर्शितः। तत्र च प्रथमपादे स्पष्टब्रह्मलिङ्गयुक्तानि वाक्यानि विचारितानि। द्वितीये त्वस्पष्टलिङ्गान्युपास्यब्रह्मविषयाणि। तृतीये पादेऽस्पष्टब्रह्मलिङ्गानि प्रायशोज्ञेतब्रह्मविषयाणि। एवं पादत्रयेण वाक्यविचारः समापितः।

इसी प्रकार मीमांसा दर्शन भी दो प्रकार की है—कर्ममीमांसा और शारीरक मीमांसा। उनमें "अथातो धर्मजिज्ञासा" से प्रारम्भ करके "अन्वाहार्ये च दर्शनात्" इस सूत्र पर्यन्त भगवान् जैमिनि के बारह अध्यायों में कर्ममीमांसा का प्रणयन किया। उसमे धर्म में प्रमाण, धर्म—भेदाभेद, शेषशेषिभाव ( अङ्गाङ्गीभाव ), क्रत्वर्थ और पुरुषार्थ के भेद से प्रयुक्ति विशेष, श्रुति, अर्थ पाठ आदि के द्वारा क्रमभेद, अधिकार विशेष, सामान्यातिदेश, विशेषातिदेश, ऊह, बाध तन्त्र और प्रसङ्ग-क्रम से बाहर अध्यायों का प्रतिपाद्य पदार्थ हैं।

इसी प्रकार जैमिनि ने चार अध्यायों में विभक्त संकर्षण काण्ड का भी प्रणयन किया। यह देवताकाण्ड के नाम से प्रसिद्ध है तथापि उपासना नाम के कर्म का प्रतिपादक होने के कारण कर्ममीमांसा के अन्तर्गत ही है। चार अध्यायों में विभक्त शारीरक मीमांसा है। इसका प्रणेता भगवान् बादरायण हैं। यह 'अथातो ब्रह्मजिज्ञासा' से लेकर 'अनावृत्तिः शब्दात्' इस सूत्र पर्यन्त विस्तृत है। श्रवण नामक विचार-प्रतिपादक न्यायों को प्रकाशित करती हुई जीव और ब्रह्म की एकता प्रतिपादन ही इसका प्रयोजन है। सभी वेदान्त वाक्यों का साक्षाद या परम्परा सम्बन्ध से प्रत्यक् से अभिन्न अद्वितीय ब्रह्म में ही तात्पर्य है—यह प्रथम अध्याय में समन्वय किया गया है। प्रथम अध्याय के प्रथम पाद में स्पष्ट ब्रह्म-लिंग से युक्त वाक्यों का विचार किया गया है। द्वितीय पाद में अस्पष्ट लिंग से युक्त उपास्य ब्रह्म विषयक वाक्यों का विचार है। तृतीय पाद में अस्पष्ट ब्रह्मलिंग से युक्त प्रायः ज्ञेयब्रह्म विषयक वाक्यों का विचार है। इस प्रकार तीन पादों में

Scanned by CamScanner

चतुर्थपादे तु प्रधानविषयत्वेन संदिह्यमानान्यव्यक्ताजादिपदानि चिन्तितानि। एवं वेदान्तानामद्वये ब्रह्मणि समन्वये सिद्धे तत्र संभावित स्मृतितर्कादिप्रयुक्तैस्तर्कैर्विरोधमाशङ्क्य तत्परिहारः क्रियत इत्यविरोधो द्वितीयाध्यायेन दर्शितः। तत्राऽऽद्य पादे सांख्ययोगकाणादादिस्मृतिभिः सांख्यादिप्रयुक्तैस्तर्कैश्च विरोधो वेदान्तसमन्वयस्य परिहृतः। द्वितीये पादे सांख्यादिमतानां दुष्टत्वं प्रतिपादितम्। स्वपक्षस्थापनपरपक्ष-निवारणरूपपर्वद्वयात्मकत्वात् विचारस्य। तृतीये पादे महाभूतसृष्ट्यादि-श्रुतीनां परस्परविरोधः पूर्वभागेण परिहृतः।

उत्तरभागेण तु जीवविषयाणाम्। चतुर्थपादे त्विन्द्रियविषयश्रुतीनां विरोधः परिहृतः। तृतीयेऽध्याये साधननिरूपणम्। तत्र प्रथमे पादे जीवस्य परलोकगमनागमननिरूपणेन वैराग्यं निरूपितम्। द्वितीये पादे पूर्वभागेण त्वंपदार्थः शोधितः। उत्तरभागेण तत्पदार्थः। तृतीये पादे निर्गुणे ब्रह्मणि नानाशाखापठितपुनरुक्तपदोपसंहारः कृतः। प्रसङ्गाच्च सगुणनिर्गुणविद्यासु शाखान्तरीयगुणोपसंहारानुपसंहारौ निरूपितौ। चतुर्थे पादे निर्गुणब्रह्मविद्याया बहिरङ्गसाधनान्याश्रमयज्ञादीन्यन्तरङ्ग-साधनानि शमदमनिदिध्यासनादीनि च निरूपितानि। चतुर्थेऽध्याये सगुण-निर्गुणविद्ययोः फलविशेषनिर्णयः कृतः। तत्र प्रथमे पादे श्रवणाद्यावृत्त्या निर्गुणं ब्रह्म साक्षात्कृत्य जीवतः पापपुण्यालेपलक्षणा जीवन्मुक्तिरभिहिता। द्वितीये पादे म्रियमाणस्योत्क्रान्तिप्रकारश्चिन्तितः। तृतीये पादे सगुण-ब्रह्मविदो मृतस्योत्तरमार्गोऽभिहितः। चतुर्थे पादे पूर्वभागेण निर्गुणब्रह्म-विदो विदेहकैवल्यप्राप्तिरुक्ता। उत्तरभागेण सगुणब्रह्मविदो ब्रह्मलोक-स्थितिरुक्तेति। इदमेव सर्वशास्त्राणां मूर्धन्यम्। शास्त्रान्तरं सर्वमस्यैव शेषभूतमितीदमेव मुमुक्षुभिरादरणीयं श्रीशंकरभगवत्पादोदितप्रकारेणेति रहस्यम्।

वाक्यों का विचार समाप्त किया गया है। चतुर्थ पाद में प्रधान विषय रूप से संदेहास्पद अव्यक्त, अज आदि पदों का विचार है। इस प्रकार वेदान्त वाक्यों

का अद्वितीय ब्रह्म में समन्वय करके द्वितीय अध्याय में उस ब्रह्म में संभावित स्मृति और तर्क आदि से प्रयुक्त तर्कों के साथ विरोध की आशंका और उसका परिहार किया गया है। अतः अविरोध प्रतिपादन ही मुख्य है। उसके प्रथम पाद में वेदान्त-समन्वय का सांख्य, योग, काणाद आदि स्मृतियों और उनके द्वारा प्रयुक्त तर्कों के साथ विरोध का परिहार किया गया है। द्वितीय पाद में सांख्य आदि स्मृतियों के मतों को दोषयुक्त बतलाया गया है। कारण यह है विचार के दो पक्ष होते हैं—स्वपक्ष की स्थापना और परपक्ष का निराकरण। तृतीय पाद के पूर्वभाग में महाभूत की सृष्टि आदि के प्रतिपादन करनेवाली श्रुतियों के परस्पर विरोध का परिहार है। उसके उत्तर भाग में जीव-विषयक विचार है। चतुर्थ पाद में इन्द्रिय विषयक श्रुतियों के परस्पर विरोधों का परिहार है। तृतीय अध्याय में साधन का निरुपण है। उसके प्रथम पाद में जीव के परलोक में गमन तथा वहाँ से पुनः आगमन के निरुपण के द्वारा वैराग्य का निरुपण है। द्वितीय पाद के पूर्वभाग में त्वं पदार्थ और उत्तर भाग में तत् पदार्थ का शोधन किया है। तृतीय पाद में निर्गुण ब्रह्म में ही अनेक शाखाओं में पठित पुनरुक्त पदों का उपसंहार किया गया है और प्रसंगत सगुण और निर्गुण विद्याओं में शाखान्तरीय गुणों का उपसंहार तथा अनुपसंहार निरुपित है। चतुर्थ पाद में निर्गुण ब्रह्मविद्या के बहिरंग साधनों और आश्रम, यज्ञ आदि अन्तरंग साधनों तथा शम, दम, निदिध्यासन आदि का निरुपण है।

चतुर्थ अध्याय में सगुण और निर्गुण विद्याओं के फल विशेषका निर्णय किया गया है। उसके प्रथम पाद में श्रवण आदि की आवृत्ति से निर्गुण ब्रह्म का साक्षात्कार करके जीते हुए ही पाप एवं पुण्य के अलेप-लक्षण जीवन्मुक्ति का प्रतिपादन है। अलेप का सम्बन्धाभाव अर्थात् उससे होने वाले स्वर्ग आदि का अभाव अर्थ है। द्वितीय पाद में मरने वाले पुरुषों की उत्क्रान्ति के प्रकार का विचार है। तृतीय पाद में सगुण ब्रह्म को जानने वाले पुरुष को मर जाने पर उत्तरमार्ग की प्राप्ति का प्रतिपादन है। चतुर्थपाद के पूर्वभाग में निर्गुण को जानने वालों के विदेह कैवल्य की प्राप्ति का वर्णन है। उत्तरभाग में सगुण ब्रह्मज्ञानी का ब्रह्मलोक में स्थिति का वर्णन है। यही सभी शास्त्रों में प्रधान है। इससे

Scanned by CamScanner

भिन्न सभी शास्त्र इसी के अङ्ग-भूत हैं। अतः मुमुक्षुओं के द्वारा श्रीशंकर भगवत्पाद की रीति के अनुसार यही आदरणीय है। यही रहस्यभूत सिद्धान्त है।

एवं धर्मशास्त्राणि मनुयाज्ञवल्क्यविष्णुयमाङ्गिरोवसिष्ठदक्षसंवर्त्त-शातातपपराशरगौतमशङ्खलिखितहारीतापस्तम्बोशनोव्यासकात्यायनबृह-स्पतिदेवलनारदपैठीनसिप्रभृतिभिः कृतानि वर्णाश्रमधर्मविशेषाणां विभागेन प्रतिपादकानि। एवं व्यासकृतं महाभारतं वाल्मीकिकृतं रामायणं च धर्मशास्त्र एवान्तर्भूत स्वयमितिहासत्वेन प्रसिद्धम्। सांख्यादीनां धर्म-शास्त्रान्तर्भावेऽपीह स्वशब्देनैव निर्देशात्पृथगेव संगतिर्वाच्या।

अथ वेदचतुष्टयस्य क्रमेण चत्वार उपवेदाः। तत्रायुर्वेदस्याष्टौ स्थानानि भवन्ति। सूत्रं शारीरमैन्द्रियं चिकित्सा विमानं विकल्पः सिद्धिश्चेति।

धर्मशास्त्र के प्रणेता अनेक आचार्य हैं। यथा—मनु, याज्ञवल्क्य, विष्णु, यम, अङ्गिरा, वसिष्ठ, दक्ष, संवर्त्त, शातातप, पराशर, गौतम, शङ्ख, लिखित, हारीत, आपस्तम्ब, उसना, व्यास, कात्यायन, बृहस्पति, देवल, नारद, पैठीनसि इत्यादि। इन सबों ने धर्मशास्त्रों की रचना की है। ये धर्मशास्त्र वर्णधर्म तथा आश्रमधर्म को विभक्त करके प्रतिपादन करते हैं। इसी प्रकार व्यास द्वारा विरचित महाभारत तथा वाल्मीकि-कृत रामायण धर्मशास्त्र के ही अन्तर्गत है और स्वयं इतिहास रूप से प्रसिद्ध है। सांख्य आदि का धर्मशास्त्र में अन्तर्भाव होने पर भी अपने विशेष शब्दों के द्वारा ही निर्दिष्ट होने के कारण उसकी संगति पृथक् ही कहनी चाहिए।

चारों वेदों के क्रमशः चार उपवेद भी हैं। उनमें आयुर्वेद के आठ स्थान होते हैं—सूत्र, शारीर, ऐन्द्रिय, चिकित्सा, निदान, विमान, विकल्प और सिद्धि।

ब्रह्मप्रजापत्यश्विधन्वन्तरीन्द्रभरद्वाजात्रेयाग्निवेश्यादिभिरुपदिष्टश्चरकेण संक्षिप्तः। तत्रैव सुश्रुतेन पञ्चस्थानात्मकं प्रस्थानान्तरं कृतम्। एवं वाग्भट्टादिनाऽपि बहुधेति न शास्त्रभेदः। कामशास्त्रमप्यायुर्वेदान्तर्गतमेव। तत्रैव सुश्रुतेन वाजीकरणाख्यकामशास्त्राभिधानात्। तत्र वात्स्यायनेन

Scanned by CamScanner

पञ्चाध्यायात्मकं कामशास्त्रं प्रणीतम् ।, तस्य च विषयवैराग्यमेव प्रयोजनम् । शास्त्रोद्दीपितमार्गेणापि विषयभोगे दुःखमात्रपर्यवसानात् । चिकित्साशास्त्रस्य रोगतत्साधनरोगनिवृत्तितत्साधनज्ञानं प्रयोजनम् ।

यह ब्रह्मा, प्रजापति,' अश्विन्, धन्वन्तरि, इन्द्र, भरद्वाज, आत्रेय और अग्निवेश्य के द्वारा उद्दिष्ट और चरक के द्वारा संक्षिप्त है अर्थात् उन लोगों ने इस उपवेद का विस्तृत रुप से विवेचन किया और चरक ने उनका सारभूत तत्त्व संक्षेप रुप से अपनी संहिता में प्रतिपादन किया । उसी में सुश्रुत ने पञ्च स्थानात्मक प्रस्थानान्तर का प्रणयन किया । इसी प्रकार वाग्भट्ट आदि आचार्यों ने भी अनेक प्रकार से इसका प्रतिपादन किया गया है तथापि शास्त्रभेद नहीं हैं, एक ही शास्त्र है । कामशास्त्र भी आयुर्वेद के अन्तर्गत ही है । उसी में सुश्रुत ने वाजीकरण नाम के कामशास्त्र का कथन किया है । वात्स्यायन ने पाँच अध्यायों में विभक्त कामशास्त्र का प्रणयन किया है । उसका सांसारिक विषय-वासनाओं से वैराग्य ही प्रयोजन है, शास्त्र से उद्दीपित मार्ग के द्वारा विषय के भोग में दुःख मात्र ही होता है अर्थात् उस भोग की परिसमाप्ति दुःख में ही होती है । चिकित्सा शास्त्र का रोग, रोग के साधन, रोग की निवृत्ति और रोगनिवृत्ति के साधन का ज्ञान ही प्रयोजन है !

एवं धनुर्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः । तत्र प्रथमो दीक्षापादः । द्वितीयः संग्रहपादः । तृतीयः सिद्धिपादः । चतुर्थः प्रयोगपादः । तत्र प्रथमे पादे धनुर्लक्षणमधिकारिनिरूपणं च कृतम् । अत्र धनुःशब्दश्चापे रूढोऽपि धनुर्विधायुधे प्रवर्त्तते । तच्चतुर्विधम्—मुक्तममुक्तं मुक्तामुक्तं यन्त्रमुक्तम् । मुक्तं चक्रादि । अमुक्तं खड्गादि । मुक्तामुक्तं शल्यावान्तर भेदादि । यन्त्रमुक्तं शरादि । तत्र मुक्तमस्त्रमुच्यते । अमुक्तं शस्त्रमित्युच्यते । तदपि ब्राह्मवैष्णवपाशुपतप्राजापत्याग्नेयादि भेदादनेकविधम् । एवं साधिदैवतेषु समन्त्रकेषु चतुर्विधायुधेषु येषामधिकारः क्षत्रियकुमाराणां तदनुयायिनां च ते सर्वे चतुर्विधाः पदातिरथगजतुरगारुढाः । दीक्षाभिषेकशकुनमङ्गलकरणादिकं च सर्वमपि प्रथमे पादे निरुपितम् । सर्वेषां शस्त्रविशेषाणामा-

चार्यस्य च लक्षणपूर्वकं संग्रहणमधिकारो दर्शितो द्वितीयपादे। गुरुसम्प्रदाय-सिद्धानां शस्त्रविशेषाणां पुनः पुनरभ्यासो मन्त्रदेवतासिद्धिकरणमपि निरुपितं तृतीयपादे।

धनुर्वेद चार पादों से युक्त और विश्वामित्र—प्रणीत है। उसका पहला दीक्षापाद, दूसरा संग्रहपाद, तीसरा सिद्धिपाद और चौथा प्रयोगपाद है। प्रथम याद में धनुष का लक्षण और अधिकारी का निरुपण है। यहाँ धनुष शब्द चाप अर्थ में रुढ़ है तथापि चतुर्विध आयुध का वाचक है। वे चार प्रकार के हैं—मुक्त, अमुक्त, मुक्तामुक्त और यन्त्रमुक्त। चक्र आदि मुक्त, तलवार आदि अमुक्त, शल्य या शक्ति और उसके अवान्तर भेद मुक्तामुक्त तथा वाण आदि यन्त्रमुक्त कहलाते हैं। मुक्त को अस्त्र और अमुक्त शस्त्र कहते हैं। वे भी ब्राह्म, वैष्णव, पाशुपत, प्राजापत्य, आग्नेय आदि के भेद से अनेक प्रकार के हैं। इस प्रकार अधिदेवता और मन्त्रों के सहित चार प्रकार के आयुधों में जिन क्षत्रिय -कुमारों का अधिकार है, उनके अनुयायी भी वे चार प्रकार के होते हैं—पदाति, रथारुढ़, गजारुढ़ और तुरगारुढ़। तुरग अश्व का वाचक है। प्रथम प्राद में दीक्षा, अभिषेक, शकुन तथा मङ्गलकरणादि निरुपित हैं। द्वितीय पाद में सभी शस्त्र-विशेषों के आचार्यों का लक्षण पूर्वक संग्रह करने की तरीका प्रदर्शित है। तृतीय पाद में गुरु सम्प्रदाय से सिद्ध शस्त्र विशेषों का पुनःपुनः अभ्यास और मन्त्र, देवता आदि का सिद्धिकरण भी निरूपित है।

एवं देवतार्चनाभ्यासादिभिः सिद्धानामस्त्रविशेषाणां प्रयोगश्चतुर्थपादे निरुपितः। क्षत्रियाणां स्वधर्माचरणं युद्धम्। दुष्टस्य दण्डश्चोरादिभ्यः प्रजापालनं च धनुर्वेदस्य प्रयोजनम्। एवं च ब्रह्मप्रजापत्यादिक्रमेण विश्वामित्रप्रणीतं धनुर्वेदशास्त्रम्।

एवं गान्धर्ववेदो भगवता भरतेन प्रणीतः। स गीतवाद्यनृत्यभेदेन बहुविधः। देवताराधनं निर्विकल्पकसमाध्यादिसिद्धिश्च गान्धर्ववेदस्य प्रयोजनम्।

एवमर्थशास्त्रमपि बहुविधम्। नीतिशास्त्रमश्वशास्त्रं शिल्पशास्त्रं

Scanned by CamScanner

सूपशास्त्रं चतु:षष्ठिकलाशास्त्रं चेति । तत्सर्वं नानामुनिभिः प्रणीतम् । अस्य च सर्वस्य लौकिकवत्प्रयोजनभेदो द्रष्टव्यः ।

एवमष्टादश विद्यास्त्रयीशब्देनोक्ताः । अन्यथा न्यूनताप्रसङ्गात् ।

इस प्रकार देवता का सेवन और बार-बार अभ्यास से सिद्ध अस्त्रविशेषों का प्रयोग चतुर्थ पाद में निरुपित है । क्षत्रियों का स्वधर्म आचरण युद्ध है । दुष्टों को दण्ड देना और चोर आदि से प्रजाओं का परिपालन = परिरक्षण करना ही धनुर्वेद का प्रयोजन है । इस प्रकार ब्रह्मा तथा प्रजापति आदि के क्रम से विश्वामित्र के द्वारा प्रणीत धनुर्वेद शास्त्र है ।

गान्धर्व वेद का भगवान् भरत ने प्रणयन किया । वह गीत, वाद्य और नृत्य आदि के भेद से अनेक प्रकार का है । देवताओं की आराधना और निर्विकल्प समाधि आदि की सिद्धि गान्धर्व वेद का प्रयोजन है ।

अर्थशास्त्र भी अनेक प्रकार के हैं । यथा—नीतिशास्त्र, अश्वशास्त्र शिल्पशास्त्र, सूपशास्त्र और चतु:षष्ठिकलाशास्त्र । ये सब अनेक मुनियों के द्वारा विरचित हैं । इन सबों का लौकिक प्रयोजनों के भेद के समान प्रयोजन भेद समझना चाहिए । इन अट्ठारह विद्याओं को त्रयी शब्द से कहा गया है, अन्यथा न्यूनता हो जायेगी ।

तथा सांख्यशास्त्रं भगवता कपिलेन प्रणीतम् । तच्च "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" इत्यादि षडध्यायम् । तत्र प्रथमेऽध्याये विषयाः निरुपिताः । द्वितीयेऽध्याये प्रधानकार्याणि । तृतीयेऽध्याये विषयेभ्यो वैराग्यम् । चतुर्थेऽध्याये विरक्तानां पिङ्गलाकुरवादीनामाख्यायिकाः । पञ्चमेऽध्याये परपक्षनिर्णयः । षष्ठेऽध्याये सर्वार्थसंक्षेपः । प्रकृतिपुरुषविवेकज्ञानं सांख्यशास्त्रस्य प्रयोजनम् । तथा योगशास्त्रं भगवता पतञ्जलिना प्रणीतम् । अथ योगानुशासनमित्यादि पादचतुष्टयात्मकम् । तत्र प्रथमे पादे चित्तवृत्तिनिरोधात्मकः समाधिरभ्यासवैराग्यरुपं च तत्साधनं निरुपितम् ।

द्वितीये पादे विक्षिप्तचित्तस्यापि समाधिसिद्ध्यर्थं यमनियमासन-प्राणायामप्रत्याहारधारणाध्यानसमाधय इत्यष्टाङ्गानि निरुपितानि। तृतीये पादे योगिविभूतयः। चतुर्थे पादे कैवल्यमिति। तस्य च विजातीय-प्रत्ययनिरोधद्वारेण निदिध्यासनसिद्धिः प्रयोजनम्। तथा पशुपतिमतं पाशुपतं शास्त्रं पशुपतिना पशुपाशविमोक्षणाय "अथातः पाशुपतं योगविधि व्याख्यास्यामः" इत्यादि पञ्चाध्यायं विरचितम्। तत्राध्याय-पञ्चकेनापि कार्यरुपो जीवः। पशुः कारणं पतिरीश्वरः। योगः पशुपतौ चित्तसमाधानम्। विधिर्भस्मना त्रिषवणस्नानादिश्च निरुपितः। दुःखान्तसंज्ञो मोक्षश्च प्रयोजनम्। एत एव कार्यकारणयोगविधिदुःखान्ता इत्याख्यायन्ते।

सांख्यशास्त्र भगवान् कपिल द्वारा प्रणीत है। वह 'अथ त्रिविधदुःखात्यन्त निवृत्तिरत्यन्त पुरुषार्थं' ( तीन प्रकार के दुखों की अत्यन्त निवृत्ति ही अत्यन्त पुरुषार्थ हैं ) से प्रारम्भ करके छः अध्यायों में कहा गया है ( उसके प्रथम अध्याय में विषयों का, द्वितीय अध्याय में प्रधान के कार्यों का और तृतीय अध्याय में विषयों से वैराग्य का निरुपण है। चतुर्थ अध्याय में पिंगल, कुरवआदि विरक्तों की आख्यायिकाएँ, पञ्चम अध्याय में परपक्ष का निर्णय और षष्ठ अध्याय में सभी पदार्थों का संक्षेप रूप से वर्णन है। प्रकृति और पुरुष के विवेकज्ञान = भेदज्ञान ही सांख्यशास्त्र का प्रयोजन है। इसी को अन्यताख्याति भी कहते हैं।

योगशास्त्र पतञ्जलि के द्वारा प्रणीत है। 'अथ योगानुशासनम्' से प्रारम्भ करके चार पादों में वर्णित है। उसके प्रथम पाद में चित्तवृत्ति निरोधात्मक समाधि, अभ्यास और वैराग्य का स्वरूप और उसके साधन का निरुपण है। द्वितीय पाद में विक्षिप्त चित्त वाले पुरुषों को भी समाधि की सिद्धि के लिये यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि इन आठ अंगों का निरुपण है। तृतीय पाद में योग से प्राप्त विभूतियों का वर्णन है। चतुर्थ पाद में कैवल्य प्रतिपादित है। इस योगशास्त्र का विजातीय प्रत्ययों = ज्ञानों के निरोध के द्वारा निदिध्यासन की सिद्धि ही प्रयोजन है।

जिसमें पशुपति का मत वर्णित है, वह पाशुपतशास्त्र है। पशुपति ने पशु को

पाश से विमुक्ति के लिये 'अथातः पाशुपतं योगविधिं व्याख्यास्यामः' से लेकर पाँच अध्यायों में निरुपण किया है। उन पाँचों अध्यायों में कार्यरूप जीव, पशुकारण, पति ईश्वर, पशुपति में चित्त की समाधि योग और भस्म से त्रिषवण स्नान आदि विधियों का वर्णन है। दुःखान्त-संज्ञक मोक्ष ही प्रयोजन है। इसी को कार्य, कारण, योग विधि और दुःखान्त शब्दों से कहा जाता है।

एवं वैष्णवं नारदादिभिः कृतं पाञ्चरात्रम्। तत्र वासुदेवसंकर्षण-प्रद्युम्नानिरुद्धाश्चत्वारः पदार्था निरुपिताः। भगवान्वासुदेवः सर्वकारणं परमेश्वरः। तस्मादुपपद्यते संकर्षणाख्यो जीवः। तस्मान्मनः प्रद्युम्नः। तस्मादनिरुद्धोऽहंकारः। सर्वे चैते भगवतो वासुदेवस्यैवांशभूताः। तदभिन्ना एवेति भगवतो वासुदेवस्य मनोवाक्कायवृत्तिभिराराधनं कृत्वा कृतकृत्यो भवतीत्यादि च निरुपितम्।

नारद आदि के द्वारा प्रणीत पाञ्चरात्र वैष्णवों का शास्त्र है। यही वैष्णवशास्त्र कहलाता है। उसमें वासुदेव, संकर्षण, प्रद्युम्न और अनिरुद्ध नाम के चार पदार्थ निरुपित है। भगवान् वासु देव सबों के कारण परमेश्वर हैं। उनसे संकर्षण नाम के जीव उत्पन्न होता है। उससे प्रद्युम्न नामक मन और उससे अनिरुद्ध नामक अहंकार की उत्पत्ति होती है। ये सभी भगवान् वासुदेव के ही अंशभूत हैं। उन सबों से अभिन्न भगवान् वासुदेव ही का मन, वाणी, शरीर और मन की वृत्तियों से आराधना करके आराधक कृतकृत्य हो जाता है—इत्यादि सभी पदार्थों का निरुपण है।

तदेवं दर्शितः प्रस्थानभेदः। सर्वेषां च संक्षेपेण त्रिविध एव प्रस्थानभेदः। तत्राऽऽरम्भवाद एकः। परिणामवादो द्वितीयः। विवर्त-वादस्तृतीयः। पार्थिवाप्यतैजस वायवीयाश्चतुर्विधाः परमाणवो द्वयणुकादिक्रमेण ब्रह्माण्डपर्यन्तं जगदारभन्ते। असदेव कार्यं कारक-व्यापारादुपपद्यत इति प्रथमस्तार्किकाणाम्, मीमांसकानां च सत्त्वरजस्तमो गुणात्मकं प्रधानमेव महदहंकारादिक्रमेण जगदाकारेण परिणमते।

पूर्वमपि सूक्ष्मरुपेण सदेव कार्यं कारणव्यापारेणाभिव्यज्यत इति

इस प्रकार प्रस्थान प्रदर्शित किया गया। संक्षेप रूप से सबों का तीन ही प्रस्थान भेद है—१ आरम्भवाद, २. परिणामवाद, ३. विवर्त्तवाद। पार्थिव, आप्य, तैजस और वायवीय चार प्रकार के परमाणु द्व्यणुकादि क्रम से ब्रह्माण्ड पर्यन्त जगत् का आरम्भ करते हैं। असत् ही कार्य कारक के व्यापार से उत्पन्न होता है—यह तार्किकों का मत है। मीमांसकों के मत में सत्त्व, रजस् और तमोगुणात्मक प्रधान ही महत्, अहंकार आदि क्रम से जगत् के आकार में परिणत होता है।

**द्वितीयः पक्षः सांख्ययोगपातञ्जलपाशुपतानाम्। ब्रह्मणः परिणामा जगदिति वैष्णवानाम्। स्वप्रकाशपरमानन्दाद्वितीयं ब्रह्म स्वमाया-वशान्मिथ्यैव जगदाकारेण कल्पत इति तृतीयः पक्षो ब्रह्मवादिनाम्। सर्वेषां प्रस्थानकर्त्तॄणां मुनीनां विवर्त्तवादपर्यवसानेनाद्वितीये परमेश्वर एव प्रतिपाद्ये तात्पर्यम्। न हि ते मुनयो भ्रान्ताः सर्वज्ञत्वात्तेषाम्। किन्तु बहिर्विषयप्रवणानामापाततः पुरुषार्थे प्रवेशो न सम्भवतीति नास्तिक्यवारणाय तैः प्रकारभेदाः प्रदर्शिताः। तत्र तेषां तात्पर्यमबुद्ध्वा वेदविरुद्धेऽप्यर्थे तात्पर्यमुत्प्रेक्ष्यमाणास्तन्मतमेवोपादेयत्वेन गृह्णन्तो जना नानापथजुषो भवन्तीति सर्वमनवद्यम्।**

**॥ इति श्रीमधुसूदनसरस्वतीविरचितः प्रस्थानभेदः ॥**

साख्य, योग, पातञ्जल तथा पाशुपत मत में पूर्वकाल में भी सूक्ष्म रूप से सत् = विद्यमान कार्य ही कारण के व्यापार से अभिव्यक्त नोता है यह द्वितीय पक्ष है। ब्रह्म का परिणाम यह जगत् है—यह वैष्णवों का मत है। स्वप्रकाश, परमानन्द, अद्वितीय ब्रह्म अपनी माया के कारण जगत् की मिथ्या ही कल्पना करता है—यह ब्रह्मवादियों का तृतीय पक्ष है। सभी प्रस्थानों के कर्त्ता मुनियों का विवर्त्तवाद में ही पर्यवसान होने के कारण अद्वितीय परमेश्वर की प्रदिपाद्यता में ही तात्पर्य है। मुनि सर्वज्ञ होते हैं, इसलिये उनको भ्रान्त नहीं कहा जा सकता, किन्तु बाह्य-विषयों में आसक्त पुरुषों को आपाततः परम पुरुषार्थ में प्रवेश सम्भव नहीं है। अतः उनके नास्तिक्य वारण के लिये मुनियों ने प्रकार

Scanned by CamScanner

भेद का प्रदर्शन किया है! उसमें उनका तात्पर्य न जानकर वेद विरुद्ध अर्थ में भी तात्पर्य को उत्प्रेक्षित करते हुए और उनके मतों को ही उपादेय मानकर ग्रहण करते हुए मनुष्य अनेक मार्गों के अनुयायी हो जाते हैं। इस प्रकार सभी प्रस्थानों का निरूपण हुआ।

॥ इस प्रकार श्री मधुसूदनसरस्वती विरचित प्रस्थानभेद की हिन्दी व्याख्या समाप्त हुई ॥



સમશીતિર્નિદ્દિષ્ટાસ્તેષા: પરબ્રહ્મ (સનાતન:)
ડાયનાસ્ગાનકી નાથો વેદવેદ્યો મહામતિ:॥
ગઅકુંરનાગપાલ:

Scanned by CamScanner